CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

SDPB
Coll. No. 600

Title Muktāvali

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak–Bhandara

No. : 600. Subject : Nyāya.

Title : Mūktāvali

Author : Siddhanta / Pañcānana Bhaṭṭa. Scribe : Pāthaka Śivabhadra.

Date of the work : — Date of the Ms. : V.S. १९६४

Place of the work : ____ Place of the Ms. : —

Size : 9.9" by 3.3" Extent : 10 foll

Language : Sanskrit. Script : Devanāgarī

Remarks : —

॥ पाठकुशिवभट

भा श्रीगणेशायनमः नूतनजलधररुचये गोपवधूटीदुकूलचौराय तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय १ द्रव्यं गुणस्तथा क-
र्मसामान्यं सविशेषकं समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः २ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः द्रव्याण्यथ गुणा रू-
१ पं रसो गंधस्ततः परं ३ स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं ४ बुद्धिः सुखं दुःखमिच्छा
प द्वेषो यत्नो गुरुत्वकं द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ५ उत्क्षेपणं ततोवक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्माण्येतानि
पंचैव ६ भ्रमणं रेचनं स्यंदनोर्द्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ७ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च द्रव्यादि
त्रिकवृत्तिस्तु सत्ता परतयोच्यते ८ परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ९ व्यापकत्वात्प राम
रापि स्याद्व्याप्यत्वादपरापि च अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः १० घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च १

संबंधः समवायः प्रकीर्तितः ११ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च १२ एवं त्रैविध्य-
मापन्नः संसर्गाभाव इष्यते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १३ द्रव्यादयः पंचभावा अनेके समवायिनः सत्तावंतस्त्रयस्त्वा-
द्या गुणादिर्निर्गुणोक्रियः १४ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः पारिमांडल्यभिन्नानां कारणत्वमुदाहृतं १५ अन्यथासिद्धि-
शून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितं १६ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायन-
यज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वं १७ यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् तत्रासन्नं द्वितीयं जनकमाभ्यां परं तृतीयं स्यात्
१८ येन सह पूर्वभावः कारणमादाय वा यस्य अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानं १९ जनकं प्रति पूर्ववर्तितामपरिज्ञाय
न यस्य गृह्यते अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः २० एते पंचान्यथासिद्धा दंडत्वादिकमादिमं घटादौ दंडरूपादि
येन सह नाम यदवच्छेदेन यस्य कार्यं प्रतिपूर्ववर्तित्वं गृह्यते अवच्छेदकभेदेन भेदः। दंडत्वं अवच्छेदकं दंड...

मुक्ता॰ द्वितीयमपि दर्शितं २१ तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पंचमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ २२ समवायिकारणत्वं द्रव्य
२ स्यैवेति विज्ञेयं गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वं २३ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते क्षित्यादीनां नवानां तु
द्रव्यत्वं गुणयोगिता २४ क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी २५ कालखात्मदिशां सर्वग
तत्वं परमं महत् क्षित्यादि पंच भूतानि चत्वारि स्पर्शवंति च २६ द्रव्यारंभश्चतुर्षु स्यादथाकाशशरीरिणां अव्याप्यवृत्तिः क्षणिको
विशेषगुण इष्यते २७ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः २८ आत्मानो भूतवर्गाश्च वि
शेषगुणयोगिनः यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् २९ स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्र राम
वत्वं तेजसो गुणाः ३० स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकं रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ३१ स्नेहहीना गंधयुताः क्षि २
र वायोर्नवैकादश तेजसो गुणा जलक्षितिः प्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चांबरे महेश्वरेऽष्टौ मन

वै॰२

तावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा ३२ धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः श
ब्दश्च ते च खे ३३ संख्यादयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे परापरत्वे संख्याद्याः पंच वेगश्च मानसे ३४ तत्र क्षितिर्गंधहेतुर्नानारूपवती मता
षड्विधस्तु रसस्तत्र गंधस्तु द्विविधो मतः ३५ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्ष
णा ३६ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी सा च त्रिधा भवेद्देहमिंद्रियं विषयस्तथा ३७ योनिजादिर्भवेद्देहमिंद्रियं घ्राणलक्ष
णं विषयो द्व्यणुकादिश्च ब्रह्मांडांत उदाहृतः ३८ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ स्नेहस्तत्र द्रवत्वं च सांसिद्धिकमुदाहृतं
नित्यतादि प्रथमवत्किंतु देहमयोनिजं इंद्रियं रसनं सिंधुर्हिमादिर्विषयो मतः ४० स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरं नैमित्ति
कं द्रवत्वं तु नित्यतादि च पूर्ववत् ४१ इंद्रियं नयनं वह्निस्वर्णादिर्विषयो मतः अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ४२ ति

मु॰ र्यग्गमनवानेषज्ञेयः स्पर्शादिलिंगकः॥ पूर्ववन्नित्यताद्युक्तं देहव्यापित्वगिंद्रियं ४३ प्राणादिस्तुमहावायुपर्यंतो विषयो मतः आकाशस्य
३ तुविज्ञेयः शब्दो वैशेषिको गुणः ४४ इंद्रियं तु भवेत्श्रोत्रमेकः सन्नप्युपाधितः जन्यानां जनकः कालो जगतामाश्रयो मतः ४५ परापर
त्वधीहेतुः क्षणादिः स्यादुपाधितः दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते ४६ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् आत्मेंद्रि
याद्यधिष्ठाता करणं हि सकर्तृकं ४७ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः तथात्वं चेदिंद्रियाणामुपघाते कथं स्मृतिः ४८ मनो
पि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् [illegible]धर्माधर्माश्रयोध्यक्षो विशेषगुणयोगतः ४९ प्रवृत्त्याद्यनुमेयोयं रथगत्येव सारथिः अहं
कारस्याश्रयोयं मनोमात्रस्य गोचरः ५० विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तु द्विविधा मता अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ५१ प्रत्य
क्षमप्यनुमितिस्तथोपमितिशब्दजे घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं ५२ घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः त ३

थारसोरसज्ञायास्तथा शब्दोपि च श्रुतेः ५३ उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्रव
त्वंपरिमाणयुक्तं ५४ क्रियां जातिं योग्यवृत्तिं समवायं च तादृशं गृह्णाति चक्षुः संबंधादालोकोद्भूतरूपयोः ५५ उद्भूतस्पर्शव
द्द्रव्यं गोचरः सोपि च त्वचः रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणं ५६ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणं मनोग्राह्यं सुखं दुः
खमिच्छा द्वेषो मतिः [illegible]कृतिः ५७ ज्ञानं यन्निर्विकल्पाख्यं तदतींद्रियमिष्यते महत्त्वं षड्विधे हेतुरिंद्रियं करणं मतं ५८ विषयेंद्रियसं
बंधो व्यापारः सोपि षड्विधः द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ५९ द्रव्येषु समवेतसमवायेन तु ग्रहः विशेषणतया तद्वदभा
वानां ग्रहो भवेत् ६१ यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते प्रत्यक्षं समवायस्य विशेषणतया भवेत् ६२ अलौकिकस्तु व्यापारस्त्रि
विधः परिकीर्तितः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ६३ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते तदिंद्रियजत
समवेतानां तथा तत्समवायतः [redacted] तद्वृत्तीनां ३

प्रका॰ दुर्मवोधसामग्र्यपेक्ष्यते ६४ विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ६५ युक्तस्य सर्वदा
५ भानं चिन्तासहकृतोऽपरः व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ६६ अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि अना
गतादिलिङ्गेन न स्यादनुमितिस्तदा ६७ व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते व्याप्तिः साध्यवदन्यस्मिन्नसंबन्ध उदाहृतः ६८
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ६९ सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठ
ति स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ७० अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासास्तु
पंचधा ७१ आद्यः साधारणस्तु स्यादसाधारणकोऽपरः तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ७२ यः सपक्षे विपक्षे च भ राम
वेत्साधारणस्तु सः यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ७३ तथैवानुपसंहारी केवलान्वयिपक्षकः यः साध्यवति नैवास्ति ५

स विरुद्ध उदाहृतः ७४ आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ७५ पक्षासिद्धिर्यत्र
पक्षो भवेन्मणिमयो गिरिः ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ७६ व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् विरुद्धयोः परामर्शे
हेत्वोः सत्प्रतिपक्षता ७७ साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ७८ ग्रामीणस्य
प्रथमतः पश्यतो गवयादिकं सादृश्यधीर्गवादीनां या स्यात्सा करणं मतं ७९ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गवयादिपदा
नां तु शक्तिधीरुपमाफलं ८० पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ८१ लक्षणा शक्यसंबंधः
स्तात्पर्यानुपपत्तितः आसत्तिर्योग्यताकांक्षा तात्पर्यज्ञानमिष्यते ८२ कारणं संनिधानं तु पदस्यासत्तिरुच्यते पदार्थे तत्र तद्वत्ता योग्यता

भा०प० परिकीर्त्तिता ८३ तत्पदेन विना यस्य नान्वयानुभावकता भवेत् आकांक्षा वक्तुरिच्छा च तात्पर्यं परिकीर्त्तितं ८४ साक्षात्कारे सुखादीनां कर
५ णं मन उच्यते अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते ८५ अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः रूपं रसः स्पर्श गंधौ
परत्वमपरत्वकं ८६ द्रवो गुरुत्वं स्नेहो वेगो मूर्त्तगुणा अमी धर्माधर्मौ भावना च शब्दो बुध्यादयोपि च ८७ एतेमूर्त्तगुणाः सर्वे वि
द्वद्भिः परिकीर्त्तिताः संख्यादिश्च विभागांत उभयेषां गुणो मतः ८८ संयोगश्च विभागश्च संख्या द्वित्वादिका तथा द्विपृथक्त्वाद
यस्तद्वदेतेनेकाश्रिता गुणाः ८९ अतः शेषा गुणाः सर्वे मता एकैकवृत्तयः बुध्यादिषट्कं स्पर्शांताः स्नेहः सांसिद्धिको द्रवः ९० राम
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः संख्यादिरपरत्वांतो द्रवोसांसिद्धिकस्तथा ९१ गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः ५

संख्यादिरपरत्वांतो द्रवत्वं स्नेह एव च ९२ एते तु द्वींद्रियग्राह्या अथ स्पर्शांतशब्दकाः बाह्यैकैकेंद्रियग्राह्या गुरुत्वादृष्टभावनाः ९३
अतींद्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः ९४ अपाकजास्तु स्पर्शांता द्रवत्वं च तथाविधं
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं ९५ स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः संयोगश्च विभागश्च वेगश्चैते
तु कर्मजाः ९६ स्पर्शांतपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वमथ वैशेषिके गुणे ९७ आत्मनः स्यान्निमित्त
त्वमुष्णस्पर्शगुरुत्वयोः वेगेपि च द्रवत्वे च संयोगादिद्वये तथा ९८ द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् वैशेषिको
विभुगुणः संयोगादिद्वयं तथा ९९ चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलंभकं चक्षुषः सहकारी स्याच्छुक्लादिकमनेकधा १००

मू० जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकं रसस्तु रसनाग्राह्यो मधुरादिरनेकधा १ सहकारी रसज्ञाया नित्यतादि च पूर्ववत् घ्राण
६ ग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः २ सौरभं चासौरभं च स द्वेधा परिकीर्तितः स्पर्शस्त्वगिंद्रियग्राह्यस्त्वचस्यादुपकारकः ३
अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ४ एतेषां पाकजत्वं तु क्षितौ ना
न्यत्र कुत्रचित् तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ५ नैयायिकानां तु नये द्व्यणुकादावपीष्यते गणनाव्यवहारे तु
हेतुः संख्याभिधीयते ६ नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ७ अनेका राम
श्रयपर्याप्ता एते तु परिकीर्तिताः अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ८ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते प ६
चौ

रिमाणं भवेन्मानव्यवहारस्य कारणं ९ अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः अनित्ये तदनित्यं स्यान्नित्ये तु नित्यमिष्यते १० संख्या
तः परिमाणाच्च प्रचयादपि जायते अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतं ११ परिमाणं घटादौ तु परिमाणजमुच्यते
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते १२ परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः संख्यावत्तु पृथक्त्वं स्यात्पृथ
क्प्रत्ययकारणं १३ अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा १४ अप्राप्तयोः
स्तु या प्राप्तिः सैव संयोग ईरितः कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः १५ तथोभयस्पंदजन्यो भवेत्संयोगजोऽपरः आदि
मः श्येनशैलादिसंयोगः परिकीर्तितः १६ मेषयोः संनिपातो यः स द्वितीय उदाहृतः कपालतरुसंयोगात्संयोगस्तरुकुंभ

प्रकाऽयाः १७ तृतीयःस्यात्कर्मजोपिद्विधैवपरिकीर्तितः अभिघातोनोदनंचशब्दहेतुरिहादिमः १८ शब्दहेतुर्द्वितीयःस्याद्विभागोपि
७ त्रिधाभवेत् एककर्मोद्भवस्त्वाद्योद्वयकर्मोद्भवोपरः १९ विभागजस्तृतीयस्यात्तृतीयोपिद्विधाभवेत् हेतुमात्रविभागोत्थो [redacted] हेत्वहेतुविभागजः २० परत्वंचापरत्वंचद्विविधंपरिकीर्तितं दैशिकंकालिकंचापिमूर्तएवतुदैशिकं २१
परत्वंमूर्तसंयोगभूयस्त्वज्ञानतोभवेत् अपरत्वंतदल्पत्वबुद्धितःस्यादितीरितं २२ तयोरसमवायीतुदिक्संयोगस्तदाश्रये
दिवाकरपरिस्पंदभूयस्त्वज्ञानतोभवेत् २३ परत्वमपरत्वंतुतदीयाल्पत्वबुद्धितः तत्रत्वसमवायीस्यात्संयोगःकालपिंडयोः २४ राम
अपेक्षाबुद्धिनाशेननाशस्तेषामुदाहृतः बुद्धेःप्रपंचःप्रागेवप्रायशोविनिरूपितः २५ अथावशिष्टोप्यपरःप्रकारःपरिदर्श्य

त्व१

स:१

ते अप्रमाचप्रमाचेतिज्ञानंद्विविधमिष्यते २६ तच्छून्येतन्मतिर्यास्यादप्रमासानिरूपिता तत्प्रपंचोविपर्याःसंशयोपिप्रकीर्तितः २७
आद्योदेहेष्वात्मबुद्धिःशंखादौपीततामतिः भवेन्निश्चयरूपायासंशयोथप्रदर्श्यते २८ किंस्विन्नरोवास्थाणुर्वेत्यादिबुद्धिस्तुसं
शयः तदभाववप्रकाराधीस्तत्प्रकारातुनिर्णयः २९ ससंशयोमतिर्यास्यादेकत्राभावभावयोः साधारणादिधर्मस्यज्ञानंसंशय
पो कारणं ३० दोषोऽप्रमायाजनकःप्रमायास्तुगुणोभवेत् पित्तदूरत्वादिरूपोदोषोनानाविधोमतः ३१ प्रत्यक्षेतुविशेष्येणविशे
षणवतासमं सन्निकर्षोगुणस्तुस्यादथत्वनुमितौपुनः ३२ पक्षेसाध्यविशिष्टेतुपरामर्शोगुणोभवेत् शक्येसादृश्यबुद्धि
स्तुभवेदुपमितौगुणः ३३ शाब्दबोधेयोग्यतायास्तात्पर्यस्याथवाप्रमा गुणःस्याद्भ्रमभिन्नंतुज्ञानमत्रोच्यतेप्रमा ३४ ॥

मोनपू१

मुक्ता ॥ अथवा तत्प्रकारं तु ज्ञानं तद्वद्विशेष्यकं तत्प्रमा नापि भ्रमः स्यान्निर्विकल्पकं ३५ प्रकारतादिशून्यं हि संबंधानवगाहि तत् प्रमा
८ त्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ३६ व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंकानिवर्त्तकः
३७ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उपाधिर्भवेत्तस्य निष्कर्षोयं प्रदर्श्यते ३८ सर्वे साध्यसमानाधिकरणाः स्यु
रुपाधयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ३९ व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनं शब्दोपमानयोर्नैव पृथक्प्रा
माण्यमिष्यते ४० अनुमानगतार्थत्वादिति वैशेषिकं मतं तन्न सम्यग्विना व्याप्तिं बोधं शाब्दादिबोधतः ४१ त्रैविध्यमनुमा राम
पानां केवलान्वयिभेदतः द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः ४२ अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते साध्याभावव्याप ८

ज्र२ ज्र१

कत्वं हेत्वभावस्य यद्भवेत् ४३ अर्थापत्तिस्तु नैवेह प्रमाणांतरमिष्यते व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ४४ सुखं तु जगता
मेव काम्यं धर्मेण जन्यते अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसां ४५ निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते इच्छा तु तदु
पाये स्यादिष्टोपायत्वधीर्यदि ४६ चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवे
त् ४७ बलवद्विष्टहेतुत्वमतिः स्यात्प्रतिबंधिका तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ४८ द्विष्टसाधनताबुद्धिर्भवेद्द्वेष
स्य कारणं प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं ४९ एवं प्रयत्नत्रैविध्यं तांत्रिकैः परिदर्शितं चिकीर्षा कृतिसाध्येष्टसाध
नताधियः ५१ यत्नो जीवनयोनिस्तु सर्वदातींद्रियो भवेत् शरीरे प्राणसंचारकारणं तत्प्रकीर्तितं ५२ अतींद्रियं गुरुत्वं स्या
नेत्यपतितस्तथा ५० उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधन ×

मू.ला. स्यात्पृथिव्यादिद्वयेतत्तत् अनित्येतरनित्यं स्यान्नित्ये नित्यमुदाहृतं ५३ तेजसामसमवायि स्यात्पतनाख्येन कर्मणि सांसिद्धिकं द्रवत्वं
९ स्यान्नैमित्तिकमथापरं ५४ सांसिद्धिकंतु सलिले द्वितीयं क्षितितेजसोः परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ५५ नैमित्तिकं वह्नि
योगात्तपनीयघृतादिषु द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ५६ स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ तैलांतरे तदुत्क
र्षो दहनस्यानुकूलता ५७ संस्कारभेदस्त्रिवेगाख्यस्थितिस्थापकभावनाः मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ५८ स्थिति
स्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणं ५९ भावनाख्यस्तु संस्कारो जीववृत्तिर राम
तीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ६० स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते धर्माधर्मौ वदृष्टं स्याद्धर्मः स्व ९

मू.१० र्गादिसाधनं ६१ गंगास्नानादियागादिव्यापारः स तु कीर्तितः कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ६२ अधर्मो नरकादीनां
१० हेतुर्निन्दितकर्मजः प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ६३ इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः शब्दो ध्वनिश्च व
र्णश्च मृदंगादिभवो ध्वनिः ६४ कंठसंयोगादिजन्या वर्णास्ते कादयो मताः सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ६५ वीची
तरंगन्यायेन तदुत्पत्तिस्तु कीर्तिता कदंबगोलकन्यायादुत्पत्तिः कस्यचिन्मते ६६ उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता सोऽयं
क इति बुद्धिस्तु साजात्यमवलंबते ६७ तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ६८ समाप्तोऽयं ग्रंथः॥ समाप्तः॥ राम. १०
संवत् १७६५ भाद्रमासे कृष्णपक्षे ७ इदं पुस्तकं समाप्तं रामायनमः रामायनमः रामायनमः रामायनमः
स्पर्द्धते तुलनेवकुंभरतयद्दिक्कुंभरैः कुंजराश्च्या व्या वा वनवासिनो मदमल्लप्रक्लिन्नगंड स्थलाः। आः कालस्य कुतूहलं अरशुसलेजाल्वीर
पाली मलस्त्रिग्धरूपापकपीलकोलि मिलिनः को नो पिसं स्पर्द्धते ॥ श्रीगं... ॥श्रीगणेशायनमः पाठकृष्ठि
...सिद्धेश्वर्यैनमः वभद्रस्य र...